International Journal of Sanskrit Research 2021; 7(5): 216-219

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 216-219
© 2021 IJSR
www.anantaajournal.com
Received: 22-07-2021
Accepted: 25-08-2021

**वेणुधरदाशः**
शोधच्छात्रः (वेद-विभागः),
ज.रा.रा.सं.विश्वविद्यालयः, जयपुरम्,
राजस्थान, भारत

**Corresponding Author:**
**वेणुधरदाशः**
शोधच्छात्रः (वेद-विभागः),
ज.रा.रा.सं.विश्वविद्यालयः, जयपुरम्,
राजस्थान, भारत

# राष्ट्रीयैकतायै संस्कृतम्

## वेणुधरदाशः

## प्रस्तावना

संस्कृतिन्नाम प्राचीनतमेषु संस्कृतग्रन्थेषु संस्कारशब्दरूपेणैव लभ्यते यस्याऽर्थः मनसो बुद्धेश्च शिक्षादिना उपस्करणमेव। मानवो न खनिनिर्गतमात्रो मणिरिव जन्मनैव सकलगुणसम्पन्नो जायते। प्रकृति: शिक्षा च द्वे कारणे तस्य गुणवत्करणे प्रकृतौ सामाजिक: पैतृकश्च वंशानुगतः प्रभाव: कारणम्। शिक्षया च सहजान् दुःसङ्गागतान् वा शीलगतान् दोषान् अपाकृत्य सुविचाराणां संक्रमणं कुप्रभावाणां च निराकरणं विधीयते। तदैव शाणोल्लिखितो मणिरिव “निसर्ग-संस्कार विनीत:” नरः सम्पद्यते। अतएव मनुना द्विजाते: संस्कारेणैव द्विजत्वं प्रतिपादितम् -

> जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते ।

इत्युक्तवता संस्कारा एव मानवस्य मानसीं बौद्धिकीं चोन्नति विदधति । संस्कृतेरर्थोऽपि संशोधिता सती उच्चतां प्राप्ता जनस्य मनसोऽवस्था। यदा नरः कुक्षिंभरितां विहाय सामाजिकतां भजते, परित्यज्यात्मपरतां न लीन। केवलमाहारविहारादिषु शारीरव्यापारेषु हिताहितं कृत्याकृत्यं च विचारयितुं क्षम: कार्यकलापे, विचारे, जीवने, धर्मे, राज्यकर्मणि, कलासु च परिष्कृतां रुचिं धारयति, तदैव स संस्कृत इत्युच्यते। स तदा न येन केनाऽपि पदार्थेन क्षुधो निवारणं कुरुतेऽपि तु भोज्यद्रव्याणि पाकादिना उपस्करादिप्रयोगेण स्वादूकरोति स्वास्थ्य बलवृद्धिहेतुतां च तेषामन्विष्यति, भवन-निर्माणेऽपि सौन्दर्याद्यभिरुचि प्रकटयति, नाऽमहितेन तुष्टः पार्श्वर्तिनामपि सुख-सौविध्यं चिन्तयति, जीवनस्य प्रयोजनप्रभृति परोक्षविषयजातमपि विमृशति, सामाजिकं संसर्गं निध्यायति, स्वार्थात् परार्थं वरतरं मनुते। अत एव कस्याऽपि समाजस्य सत्या उन्नतिः संस्कृतेरुन्नयने एव निहिता।

अद्यतनी भारतीया संस्कृतिर्मूलत: प्राचीनतमाऽपि न स्वरूपेण तथा। तस्या आद्यं रूपमार्यसंस्कृतिरेव या खलु कालक्रमेण विविधान् बाह्यान् प्रभावान् आत्मसाद् विदधती समयानुरूपाणि तत्वानि स्वीकुर्वती बलीयस्तराऽजायत । आर्यसंस्कृतिरासीद् वैदिकी संस्कृतिर्यस्याः स्वरूपं वेदेषु, वेदाङ्गेषु, रामायणे, महाभारते, पुराणेषु, दर्शनेषु, तत्काल-प्रतिबिम्बेषु, राजनीति-ग्रन्थेषु, स्मृतिषु, कलासु किं बहुना, सर्वेष्वपि जीवनादर्शेषु “सूत्रे मणिगणा इव” सर्वत्र प्रोतम् । तस्या: प्रभावोऽद्याऽपि तिलेषु तैलमिव, क्षीरे नवनीतमिव अस्मासु निहितो लक्ष्यते । कामं सा पुराऽपि नाऽतिष्ठत् सदैव एकविधा; कदाचिदभूत् सूक्ष्मोपासनामयी, अन्यथा च यज्ञमयी भवन्ती परं न तस्या मूलतत्त्वानि अभिद्यन्त। महाभारतादनन्तरं च वैदेशिकेषु आक्रान्तृषु वैरभावनया समागतेषु तानपि जाह्नवीव क्षपित-सकलकलुषा नदाविव आत्मसाद् विदधती पुष्टिम् अयासीत् ।

शक-हुण-पार्थिव-कुषाण-पह्लव-प्रभृतयोऽनेका जातयोऽत्रैव लीनाः। तासां संस्कृतीनां कलामया गुणास्तयाऽपि अगृह्यन्त परम् आत्मा तु तासां स्वतोऽभिन्न एव व्यधीयत। प्रमाणं चाऽत्र-ग्रीसदेशस्य राजदूतेन हेलियोडोरसनाम्ना विदिशायां (आधुनिक भेलसा) स्थापितो गरुडध्वज-नाभा स्तम्भः। शकैः शैवमतानुयायिता, कुषाणैः बौद्धधर्मेऽभिरुचिरङ्गीकृता।

श्रूयन्ते नाम इतिहासेषु सौमेरवानाम् (सुमेरिया), असुर्याणाम् (असीरिया), बावलून्यानाम् (बेबिलोनिया) मिश्राणाम् (मिसर) च प्राचीनतराणां संस्कृतीनामाख्यानानि। क्वाद्य तासाम् अवशेषः? क्व च रक्त-रक्तैतिह्यानां पश्चिमैकाधिपतीनां रोमिलानाम् (रोमन) चिह्नम्? सर्वेऽपि कालस्य दंष्ट्रा-क्रकच-चर्वितास्तस्यैवोदरसादजायन्त। परं सैव अद्य आर्यसंस्कृतिः कामं यातेष्वपि सहस्रशो लक्षाधिकेषु वर्षेषु भागीरथीव अविरतप्रवाहा, सिन्धुवेलेव आलंघितमर्यादा, रविप्रभेव भास्वरा, उषा इव विगतदोषा, शाटीव अनल्पगुणमयी, कौमुदीवाऽनुरञ्जितनिखिललोका, वात्येव देशकालोपगतरजोधूसरा कान्तेव कमनीयरूपा आहिमाद्रेः आकुमार्याश्च निरन्तरमनुप्राणयति भारतीयान्। अद्यापि पावनतमाः पूज्यतमाः प्रामाणिकतया अध्येयतमाश्च वेदा आर्याणाम्। अधुनाऽपि भजति रसनां, पूरयति कर्णौ संस्करोति तेषां हृदयं गायत्री-मन्त्रः। साम्प्रतम् अपि जन्मनि, चौलकर्मणि, उपनयने, विवाहे, किं बहुना, अन्त्येष्टयां च तेषां श्रुतय एवोच्चार्यन्ते। रामः कृष्णो, बुद्धो महावीरः शङ्करश्च क्व न तैः स्मर्यन्ते सादरं सश्रद्धं च। काममिदानीं जिनाः, सौगताः, शिष्याः (सिख) राजनीत्यादिविलोभिता नात्मानं हिन्दू स्वीकुर्वन्ति परं मूलतो नास्ति तादृशं वैभिद्यम्। कं नाऽऽह्लादयति रामायणी महाभारतीया वा कथा? आकृत्या, प्रकृत्या, रीत्या, नीत्या, शिक्षया, दीक्षया, आहारेण, विहारेण, आचारेण, विचारेण च भिन्नेष्वपि कोणात् कोणं भारतीयेषु वर्तते प्रतिदेहं व्यापकमात्मतत्त्वमिव किमपि सूत्रं यत् तान् स्रजीव, हार इव च गुम्फत्येव मिथः। पुरा यथा यज्ञप्रधानायाः संस्कृतेः उत्कर्षे तत्संशोधनात्मकमौपनिषदं सौगत जैनं वाऽऽत्मशुद्धिपरं त्याग-ज्ञान-तपः प्रधानं स्वरूपमुदभवत् तथैवाऽधुनापि पाश्चात्य- संस्कृति- सभ्यता- सम्पर्कप्रभावाद्देशकालगतवस्तुस्थितिमनुरुध्य च प्रार्थना-देव- ब्राह्माऽऽर्यसमाजानाम् उदयः। पर तत् संयोजकं सूत्रम् एतेष्वपि सर्वेष्वविच्छिन्नं सर्वानपि एकीकुरुते। तत् सूत्रं च सा संस्कृतिरेव यया वयं श्वसिम उच्छ्वसिमः प्राणिमः संस्क्रियामहे अनेकेऽपि चैकीक्रियामहे। सन्ति तस्याः केचिद्गुणा यैः संदानितः नौरिव कराले भीषण-विवर्तावर्त-चक्रविकारालेऽपि काल- पारावारे वैदेशिकाकमणझञ्झाजर्जरिताऽपि सा नाऽगाच् चिरस्मरणीयताम्। तेषां सर्वप्रथमे विशेषः-

**सहिष्णुता-**

मोहमदानुयायिनां ख्रिस्तधर्मावलम्बिनां चेतिहासो भिन्नधर्मावलम्बिनामितर-सम्प्रदायभाजां च रक्तपातेन पूर्णः। शिया-सुन्नीसम्प्रदाययो-कैथोलिक-प्रोटेस्टेन्टमतयोश्च मिथो विरोधो न कस्याऽपि अविदितः। परम् अस्माकं संस्कृतिः सर्वानपि प्रति सहिष्णुतां शिक्षयति। अत एवेश्वरवादिभिः सहाऽनीश्वरवादीनि दर्शनान्यपि सामान्येन प्रामाण्यमभजन्। निदर्शनं चऽत्र सांख्यं पूर्वमीमांसा च। वैदिकैः सह वेद-विरुद्धानि जैन-बौद्ध-चार्वाकादीनि दर्शनान्यपि यथाऽत्र विकसितानि तदपि सर्वे जानन्त्येव।

**धर्मस्य प्राधान्यम्-**

भारतीया संस्कृतिः सर्वेष्वपि जीवनक्षेत्रेषु धर्मस्यैव प्राधान्यमङ्गीकरोति। राजनीतावपि सदसत्पक्षौ, युद्धेऽपि सामान्य-धर्मस्य पालनम्, अर्थोपार्जने च तस्य कारणता प्रमाणम्। ज्ञाने विज्ञाने, रागे विरागे, दर्शने साहित्ये, शिल्पे कलासु च तस्य प्रमुखता। कामोऽपि अत्र "धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ" इत्युक्तेः धर्माऽनुमत एवाऽङ्गीकृतः।

**समन्वय-भावना-**

अत्र जगतो मूलशक्तिः सृष्टेर्निर्माणरक्षा-प्रलय-हेतुतया त्रिविधा मता ब्रह्मविष्णुमहेशनामभिः। तस्या एवं माहात्म्यात् त्रयस्त्रिंशत् तावत्कोटि- संख्याश्च देवाः स्वीकृताः। "देवताया माहाभाग्याद् एक एवात्मा बहुधा स्तूयते" इति यास्कवचनानुसारेण एक एव देव-स्तावद्भिरेवरूपैः यथाश्रद्धं पूज्यते, "एकैवाहं जगत्यत्र द्वितीया का ममापरा" इत्युक्तदिशा च तस्मिन् रूपबाहुल्येऽपि अनन्यत्वं (Unity in multiplicity) प्रतिष्ठितम्। मा तावद् विचारभेदेन कलहोऽभूदिति कृत्वा परस्परं समन्वयात्मिका वृत्तिश्च तत्र वर्तते। पुराणेष्वेकैकस्य उत्कृष्टत्व-वर्णनेऽयमेव हेतुः। अन्ते च "तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमा" इति उक्त्वा सर्वेषामेकस्मिन् देवे लय उक्तः।

**आध्यात्मिकता-**

भारतीयसंस्कृतेः प्राणशक्तिराध्यात्मिकतैव; नेयं देहात्मवादाऽपरनाम्नि जडवादे विश्वसिति। आत्मनोऽखिलपदार्थ- व्यतिरिक्तता, अमरता, सार्वत्रिकता च तस्या मौलिकः सिद्धान्तः। एतेषां प्रथमं तत्त्वमाश्रित्य आर्याणां मुक्तिश्चरमः पुरुषार्थो जीवनस्य। धर्मश्च कामार्थमोक्षाणां हेतुरुच्यते। इतरेण जीवस्य जीवन-संग्रामे सततमाशावादात्मविश्वासश्च स्फुरतः। पुनर्जन्मनि विस्रम्भः "अनेकजन्म-संसिद्धस्ततो याति परां गतिम्" इति जन्मान्तरेऽपि लक्ष्यप्राप्तेः आशां न व्याहन्ति। आत्मनः सततमूर्ध्वा गतिः स्वीकृता यया प्रयतमानः स कस्मिन्नपि जन्मनि ब्रह्मभूयं शाश्वतानन्दे चरमलक्ष्यभूते लयमृच्छति।

अन्तिमेन तत्वेन भूतमात्रैकस्यैवात्मनोऽस्तित्वाऽनुभूते लयमृच्छति । अन्तिमेन तत्वेन भूतमात्रैकस्यैवात्मनोऽस्तित्वाऽनुभूते: "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षत योगयुक्तात्मा सर्वत्र समदर्शनः॥" इति सर्वभूतात्मवादः "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिता: समदर्शिनः॥" इति प्राणिमात्रे समत्ववुद्धिः, "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया: । सर्वे भद्राणि पश्यन्तु भा कश्चिद्दुःखभाग् भवेत् ॥" इति विश्वकल्याणभावना प्रसूयते। वर्णाश्रमव्यवस्थया समाजस्य मानवायुषश्च श्रमः, कर्मक्षेत्रं च नियम्येते। "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य आयते महतो भूयात्" इति दृष्ट्या संग्राहिका शक्तिः अनुप्राणयति ताम्। अनयैव शक्त्याऽऽर्यै: पूर्वकाले विदेशेभ्य आगता आक्रामका: शका:, पार्थिवा:, पह्वा:, बाखत्रियाः (बैक्ट्रियन) हूणाश्च कालान्तरेणाऽऽत्मसात् कृताः । "उदारचरितानां तु वसुधैव कुटुम्बकम्" इति भावना कुर्यात् विश्वस्य कोणे कोणे प्रसारायाऽनुमेने । तत एव चम्पादेशे, खोतानदेशे, यव-वरुण-मलय- स्यामादिदेशेषु द्वीपान्तरेषु चात्रत्या ब्राह्मणा अन्ये यात्रिणश्च स्व-संस्कृते: प्रचारं व्यदधुः। चन्द्रगुपतमौर्यः शल्यौकसः (सैल्यूकस) तनयामुपयेमे। श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनूष्ठितात् । "स्वधर्मे निधनं श्रेय: परधर्मो भयावह:" इति घोष एव यवनशासकविहितान् घोरतरान् अत्याचारान् सहमानेभ्य आर्येभ्यस्तादृशम् आत्मबलम् अदात् येन ते मृत्युं वरं मेनिरे न विधर्मम् । भोगेऽपि त्यागस्य वृत्तिः, सर्वासां विद्यानां कलानां च परमात्मनि सायुज्यमेव चरमपुरुषार्थः । "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इति कर्मफलभोगे विश्वासोऽपि तस्या विशेषः परं नाऽत्र प्रोपाय धनप्रदानेन कर्णो स्पृष्ट्वा "तौबा तौबा" इति कथनेनैव कर्मफलान् मुक्तिः। ज्ञानेन तपसा च कर्मक्षय इत्यस्य सिद्धान्तः सन्ति। तीर्थयात्रादि कर्माणि पापनाशकत्वेन प्रोक्तानीति सत्यं परं न तदनुष्ठानमात्रं पापमोचनक्षममपितु भूयो भूयस्तदाचरणेन मानसवृत्तेः संशोधनं यथा न चेतो दुष्कर्मणि प्रसज्जेत। "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोचयिष्यामि मा शुचः॥" इति कथनं न कस्यचिद्देवदूतस्य, पुरोहितस्य साम्प्रदायिकाचार्यस्य वाऽपि तु साक्षाद् भगवतो यस्योपदेशः पापपुण्यधियं लाभाऽलाभचिन्तां वा विहाय कर्त्तव्यबुद्ध्या स्वकर्माऽनुष्ठानम्। अत एव "हतो वा प्राप्स्यसि स्वर्ग जित्वा वा भोक्ष्यसे महीम्। ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥" इति कल्याणानुबन्धि वचनं संगच्छते । यत: प्रभृति दृष्टिरियं विशाला त्यक्ताऽऽर्यैः, विहायाऽऽध्यात्मिकतां भौतिकताऽऽलिङ्गता, धर्मस्य सत्यं रूपं विस्मृत्य बाह्याचार एव धर्मबुद्धिः स्थापिता, सर्वभूताऽऽत्मवादितां परित्यज्य स्वेष्वपि परभावना घृणा च स्वीकृता "कृतं मे दक्षिणे हस्ते जयो मे सव्य आहित:।" इति पुरुषार्थे मति हित्वा, भाग्यं फलति सर्वत्र न विद्या न च पौरुषम् इतिभाग्यवाद आहिता आस्था, "कृण्वन्तो विश्वमार्यम्" इत्युदारो भावो विस्मृतः, तदवध्येव तेषां पतनं, दौर्गत्यं, दैन्यं, पराभूतिः निर्वीर्यता च। स्वकीयं काञ्चनमपहाय काचे प्रणयस्तेषाम्। सिंहोऽद्य शृगालतां भजते । हता मनस्विता तेषाम् कलहपरता, गेहेशूरता, पात्रेसमितताऽर्थपिशाचता चांगीकृता तैः । अत एवं दिने दिने तनूभवति तेषां संख्या ते विषीदन्ति च।

**विश्वस्मिन् लोके प्रभावः-**

नाभूवन्नार्योः पुरा कूपमण्डकाः । "इक्ष्वाकूणामियं पृथ्वी सशैलं वनकानना"। उदन्वति, आकाशे, महीधरेषु च न तेषां रथस्य गतिर्विजघ्ने।। इत्थं सागरेषु तेषां पोता वाणिज्यमकुर्वन् प्राभवंस्ते ज्ञाने विज्ञाने च । तेषां सांस्कृतिकविजयस्य लभ्यन्तेऽद्यापि यदा कदा प्रमाणानि। सुदुरेऽभरीकादेशेऽमरकेश्वरनाम्नः शिवलिङ्गस्य प्राप्तिः, रूसदेशे अरबदेशेच प्राञ्चि आर्यचिह्नानि, यवद्वीपे (जावा), स्वर्णाद्वीपे (सुमात्रा) बलिद्वीपे ( बाली) वरुणद्वीपे (बोर्नियो) मलयद्वीपे (मलाया) च भारतीयानां रामायण-महाभारतादीनां कथा: तत्तद्भाषासु संस्करणानि च सार्थयन्ति एतत् कथनम्। सिंहलद्वीपे भारतीयराजकुमारस्य राज्यस्थापना, अशोकेन कृत: संघमित्रया सह महेन्द्रस्य प्रेषणेन सिंहलद्वीपे बुद्धधर्मस्य प्रचारः बुद्धघोषपण्डितकृतस्तत्रत्यभाषायां त्रिपिटकानुवादः, कुमारजीवशान्तिरक्षितादीनां बौद्धाचार्याणां चीने, त्रिभ्विते (तिब्बत), कुरुषु (कोरिया), जयपाणौ (जापान) च प्रवास: भारतीयानामार्याणां सांस्कृतिकं विजयं दिशति । अरबदेशे चरकसंहितायाः पञ्चतन्त्रस्य चाऽनुवादः, भारतीयगणितादङ्कानां ग्रहणं हिन्दसासंज्ञया सूचितं तत्राऽऽर्यसंस्कृते: साहित्यसंचारित प्रमाणं सूचयति । पश्चिमेन सह सम्पर्के जाते तत्राऽपि लक्ष्यत आर्यसंस्कृते: प्रभावः। विवेकानन्देन रामतीर्थस्वामिना च सहस्रश आंग्लदेशीया अमेरिकावास्तव्याश्च आर्यसंस्कृतौ सरुचयः कृता गीतातुलसीमालाधारिणश्च विहिता: । भगिनीनिवेदिता तादृश्येव पाश्चात्यमहिलाऽऽसीत् । अरविन्दाश्रमे मातृपदामान्या महिला फ्रांसदेशीयाऽभवत् । अद्यापि श्रूयतेऽमरीकादेशे कृष्णभक्ते: प्रचार:। अद्याऽपि भारतीयसंस्कृतेः अमरता स्मारयिष्यति वचनमिदं मनोः प्रभवति चेद् विश्वस्मिन् शन्ति-प्रतिष्ठायाम्-

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षरेन् पृथिव्यां सर्वमानवाः॥

**सन्दर्भग्रन्थसूची-**


1. अथर्ववेदः, सम्पा.दमोदरसातवलेकरः, वलसाड : स्वध्यायमण्डलः, १८६५।
2. शतपथब्रह्मणम्, सम्पा.हरिस्वामी, दिल्ली : नागपब्लिशर्स, २००२।
3. प्रश्नोपनिषद्, गोरक्षपुर : गीताप्रेस, १९९८।
4. छान्दोग्योपनिषद्, गोरक्षपुर : गीताप्रेस, १९९४।
5. शुक्लयजुर्वेद (माध्यन्दिनसंहिता), सम्पा.रामकृष्णशास्त्री, वाराणसी : चौखम्बाविद्याभवन, २०१३।
6. अमरकोषः, सम्पा.हरगोविन्दशास्त्री, वाराणसी: चौखाम्बासंस्कृतप्रतिष्ठान,१९९३।
7. ऋग्वेदः, सम्पा. रामगोविन्दशास्त्री, वाराणसी : चौखाम्बाविद्याभवन, २००७।
8. तैत्तिरीयसंहिता, सम्पा., टि.धर्माधिकारी, पुणे : वैदिकसंशोधनमण्डल, १९११।
9. ऋग्वेदभाष्यभूमिका ,प्रकाशन चौखम्बा ,सायणाचार्य -२०१३।
10. मनुस्मृति संस्कृत चौखम्बा ,शास्त्री हरगोविन्द श्री.पं - ,सिरिज२०१४।
11. वैदिकवाङ्मयस्य इतिहास आयुर्वेद ,झा कुमार शम्भु.डॉ - प्रकाशन यपुरज ,२०१२।
12. श्रीमद्भागव्दगीता- गीतचाप्रेस, गोरखपुर।